म्यहं॥ ॐ ब्रांब्रींब्रूंब्रेंब्रौंब्रः॥ ब्रह्मशापमोचितायैसुरादेव्यैनमः इतित्रिः
सूर्यमंडलसंभूतेवरुणालयसंभवे॥ अमाबीजमयेदेवीशुक्रशापा
द्विमुच्यतां॥ श्रांश्रींश्रूंश्रैंश्रौंश्रः॥ शुक्रशापविमोचितायैसुरादेव्यैन
मः॥ इतित्रिः॥ वेदानांप्रणावोबीजंब्रह्मानंदमयीयदि॥ तेनसत्येनहेदे

ॐ

का॰प॰
३९
39

विब्रह्महत्यांव्यपोहतु॥ ह्रींश्रीं क्रांक्रींक्रूंक्रैंक्रौंक्रः॥ सुराकृतमशापंमो
चयमोचय॥ अमृतंस्रावयस्रावयस्वाहा॥ इत्यपवित्रिः॥ ॐहंसः शु
चिसद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्नृषद्वरसदृतस
त॥ अब्जागोजाऋतजाअद्रिजाऋतंमहत्॥ इत्यपवित्रिः॥ पावमानं
परंपरंब्रह्म॥ पावमानःपरोरसः॥ पावमानपरोज्ञानंतेनत्वांपावया
म्यहं॥ इत्यपवित्रिः॥ आनंदभैरवंध्यायेत्॥ यथा॥ ॐसूर्यकोटिप्रतीका

शिव
३९

णं चंद्रकोटिसुशीतलं ॥ अष्टादशभुजं देवं पंचवक्त्रं त्रिलोचनं अमृता

र्णवमध्यस्थं ब्रह्मब्रह्मोपरिस्थितं ॥ व्याघ्रदंतं नीलकंठं सर्वाभरण

भूषितं ॥ कपालखट्वांगधरं घंटाडमरुवादिनं ॥ पाशांकुशधरं दे

वं गदामुसलधारिणं ॥ खड्गखेटकपट्टिशं मुद्गरं शूलकुंतिनं वि

चित्रखेटकं मुंडं वरदाऽभयपाणिनं ॥ लोहितं देवदेवेशं भावयेत्सा

धको त्तमः ॥ दत्वा पुष्पांजलिं कुंभे जपेदानंदभैरवं ॥ इति ध्यात्वा

ॐ ह्सक्ष्मलवरयऊं आनंदेश्वर भैरवाय वौषट्॥ इति दशधा प्रजप्य आनंद भैरवांकोपविष्टां सुरादेवीं ध्यायेत्॥ यथा॥ समुद्रमथ्यमाने तु क्षीराब्धौ सागरोत्तमे॥ तत्रोत्पन्नां सुरांदेवीं कुमारीं रूपधारिणीं भावयेच्च सुरांदेवीं चंद्रकोटियुतप्रभां॥ हिमकुंदेंदुधवलां पंचवक्त्रां त्रिलोचनां॥ अष्टादशभुजैर्युक्तां सर्वानंदकरोद्यतां॥ प्रहसंतीं विशालाक्षीं देवदेवस्य सन्मुखीं॥ इति पठित्वा॥ सह्क्ष्मलवरयूं सुरादेव्यै

काः प
४०
४१

काः प
४०

वौषट् ॥ इति दशधा प्रजप्य ॥ आनंदभैरव्यौ संपूज्य ॥ ड्व्यमध्ये दक्षिणा

वर्तेन त्रिः पंचपा ॥ ग्रं ॥ १९ ॥ कं ॥ १९ ॥ यं ॥ १९ ॥ इति शक्तिचक्रं विलिख्य त

न्मध्ये ॥ हुंहुं ॥ ऽत्समावेशाद्द्व्यमध्ये ऽमृतं विचिंत्य ॥ वमिति सुधाबीजं

मूलमष्टधा घटं धृत पठेत् ॥ इति कलशपूजा ॥ अथ श्रीपात्रपूजा त

त्र आत्मश्रीचयोर्मध्ये ॥ त्रिकोणषट्कोणावृत्त चतुरस्रं विलिख्य च

तुरस्रे ॥ पूर्णगिरिपीठाय नमः ॥ ह्रांह्रे त्रपा[illegible]नमः ॥ पूर्वे ॥ उड्यानपी

ॐ
का॰य
४१
41

ठायनमः॥ कामरूपपीठायनमः॥ पश्चिमे॥ जालंधरपीठायनमः ३
त्तरे॥ इतिसंपूज्य॥ क्लींह्रींनमः॥ अग्रे॥ स्त्रींहुंनमः॥ दक्षे॥ फट्नमः
वामे॥ इतित्रिकोणांसंपूज्य॥ मध्ये॥ ह्रींआधारशक्तयेनमः॥ इतिसंपू
ज्य॥ त्रिकोणगर्भे॥ त्रिकोणायट्कोणाभूषितांयंत्रिकांसंस्थाप्य नमः
इतिसामान्यार्घ्यजलेनाभ्युक्ष्य॥ अंयंधूम्रार्चिषेनमः॥ रंउष्मायैनमः
लंज्वलिन्यैनमः॥ वंज्वालिन्यैनमः॥ शंविस्फुलिंगिन्यैनमः यंसुश्रि

गि॰त्र
४१

येनमः॥ संस्वरूपायेनमः॥ हंकपिलायेनमः॥ लंहव्यवाहायेनमः
ङंकव्यवाहायेनमः॥ मंवह्निमंडलायदशकलात्मनेनमः इतिसं
पूज्य॥ षट्कोणेषडंगंप्रजयेत्॥ मध्येमूलदेवीप्रपूज्य॥ अस्त्रायफट् इति
नारिकेलादिपात्रंप्रक्षाल्य॥ त्रिकोणावृत्तषट्कोणांपात्रेविलिख्य यं
त्रिकोपरिसंस्थाप्य॥ कंभंतपिन्येनमः॥ खंबंतापिन्येनमः॥ गंफंधूम्रायै
नमः॥ घंपंमरीच्येनमः॥ ङंनंज्वालिन्येनमः॥ चंधंरुच्येनमः॥ छंदंसु

ॐ

मगायेनमः॥ जंथंभोगदायेनमः॥ रुंतंविद्यायेनमः॥ जंरांवोधिन्येन
मः॥ टंठंधारिरोपेनमः॥ ठंडंहमायेनमः॥ इतिग्रंथ्यर्कमंडलायधाद्
शकलात्मनेनमः॥ इतिसंपूज्य॥ ततःसमस्तव्यस्तमंत्रेणसंपूज्य त्रि
लोममातृकांवरुणावीजमूलंचपठन्॥ अमृतेनत्रिकोणंप्रपूज्य ज
लेनभागमेकंप्रपूर्य॥ तत्रस्वगंधादिनिक्षिप्य॥ अंअमृतनायेनमः आं
आनंदायेनमः॥ इंपूषायेनमः॥ ईंतुष्ट्येनमः॥ उंपुष्ट्येनमः ऊंरत्ये

नमः ॥ ऋं धृत्यै नमः ॥ ॠं शशिन्यै नमः ॥ ऌं चंद्रिकायै नमः ॡं कान्त्यै
नमः ॥ एं ज्योत्स्नायै नमः ॥ ऐं श्रियै नमः ॥ ओं प्रीत्यै नमः ॥ औं अंगदायै न
मः ॥ अं पूर्णायै नमः ॥ अः पूर्णामृतायै नमः ॥ इति षोडशकलात्मने सो
ममंडलाय नमः ॥ इति संपूज्य ॥ सर्ववत्सयंत्रं द्रव्ये विलिख्य ॥ त्रिकोणात्रि
रेखायां ॥ अं ॥ र्द ॥ कं ॥ र्द ॥ थं ॥ र्द ॥ इति विलिख्य ॥ मध्ये हंसं विलिख्य
मूलं ॥ खंडत्रयेन त्रिकोणां संपूज्य ॥ षट्कोणोपांगं पूजयेत् ॥ गंगेत्यादि

ॐ

तीर्थमावाह्य॥ आनंदभैरवभैरव्यौ स्वस्वमंत्रेणासंपूज्य॥ ह्रूंमर्त्यरत्नेभ्योनमः॥ ह्रूंपातालरत्नेभ्योनमः॥ मध्ये॥ ह्लूंनागरत्नेभ्योनमः॥ इतिसंपूज्य ततः शुद्ध्यादिकंशोधयेत्॥ यथा॥ चतुरस्रंमंडलंविलिख्य॥ तत्रशुद्धिपात्रं संस्थाप्य॥ यमितिसंशोष्य॥ रमितिसंदह्य॥ वमित्याप्लाव्य॥ धेनुयोनिमुद्रांप्रदर्श्य॥ छागलाजेनमांसेनकृतंसमयविग्रहमेव॥ वल्प्यर्थंशिवशक्त्योस्तं प्रपद्येविग्रहमव्ययं॥ प्रातर्प्ययामिवल्प्यर्थंपवित्रीभवसांप्रतं ॐ

प्रतद्विष्णुस्तवतेनवीर्येण॥ मृगोनभीमःकुचरोगरिष्ठः॥ यस्योरुषुत्रि
षुविक्रमेष्वधिक्षयंतिभुवनानिविश्वा॥ इतिद्वितीयंसंशोध्य ततस्तैरे
व॥ तथैवचतुरस्रेसुद्धिपात्रंसमारोप्य॥ पूर्ववत्॥ यामितिसंशोध्य रमि
तिसंदर्श्य॥ वमित्याज्ञाप्य॥ पूर्वोक्तमुद्रात्रयंप्रदर्श्य॥ कृत्वावतारोहरि॥॥
कालिनापीडितंजगत्॥ भैरवीपरितोषार्थेस्वयंमीनोभवद्धरिः॥ ह्रीं
रयेनमः॥ ॐत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं॥ उर्वारुकमिवबंधना

ॐ
का॰प॰
४४
44

न्मृत्योमुक्षीयमामृतात्॥ इतितृतीयंसंशोध्य॥ पुनः तथैवचचतुरस्त्रेमुद्रा
पात्रंसंस्थाप्य॥ शोधनादिकंपूर्ववद्विधाय॥ मुद्रात्रयंप्रदर्श्य॥ देवताद्
जनीयानिपुरवीजानिसाधितं॥ वल्पर्थदेवदेव्योश्चपवित्राणीहिसिद्धये
॥ ॐतद्विष्णोः परमंपदंसदापश्यंतिसूरयः॥ दिवीवचक्षुराततंतद्विप्रा
सोविपराणवोजाग्रवांसाससमिंधतेविष्णोर्यत्परमंपदं॥ इतिचतुर्थीसंशो
ध्य॥ ॐविष्णोर्योनिंकल्पयतु॥ त्वष्टारूपाणिविंशतु॥ आसिंचतुप्रजापति

सि॰
४४

धातागर्भंदधस्वमे ॥ ओं गर्भंदेहि सिनीवाली गर्भंदेहि सरस्वती गर्भंदे
ह्यश्विनौदेवावाधत्तांपुष्करस्रजा ॥ ओं ऐं सौं क्रौं जुंसः अमृतेअमृतोद्भ
वेअमृतेश्वरीअमृतवर्षिणीअमृतंस्रावयस्रावयस्वाहा इतिगोला
दिशुद्धिः ॥ ततः ॥ सर्वंहुमित्यवगुंठ्य ॥ धेनुमुद्रयाऽमृतीकृत्य नालत्र
येनदशदिग्बंधनंकृत्वा ॥ तदुपरिमूलंसप्तधाजपित्वा ॥ सर्वशंतत्रकार
णोनिक्षिप्य ॥ मूलं ॥ ब्रह्मांडरससंभूतमशेषरसमावह ॥ आपूरितं म

ॐ

का॰प॰
४५

45

ह्रापात्रे पीयूषरसमावह॥ अखंडैकरसानंदकरे परशुधात्मनि॥ स्वच्छं

दस्फुरणामत्र निधेह्यकुलरूपिणी॥ अकुलस्यामृताकारे सिद्धिज्ञा

नकरे परे॥ अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणी॥ तद्रूपेणैक

रस्यं च कृत्वास्य तत्स्वरूपिणी॥ भूत्वा परामृताकारं मयि चित्स्फुरणं

कुरु॥ अनेन नकारणामामंत्र्य॥ तत्र स्वमूलदेवतामावाह्य तालत्रये

णादिशः संबध्य॥ अवगुंठनमुद्रयावगुंठ्य॥ धेनुयोनिं प्रदर्श्य षडंगे

शिव
४५

नमस्कलीकृत्य॥ मत्स्यमुद्रया पात्रमाछाद्य॥ मूलं दशधा जप्त्वा देवताद्
पं पात्रं विधाय॥ ततो देव्यात्तां गृहीत्वा॥ पात्राणि स्थापयेत् यथा घटस्
मी गुरुपात्रं॥ शक्तिपात्रं॥ भोगपात्रं॥ योगनीपात्रं॥ वीरपात्रं बलिपा
त्रं॥ स्वपात्रं॥ पाद्यपात्रं॥ अर्घपात्रं॥ आचमनीयपात्रं॥ मधुपर्कपात्रं
इति संस्थाप्य॥ आनंदभैरवमंत्रेण॥ श्रीपात्राऽमृतेन॥ भाले त्रिधा आ
नंदभैरवं संतर्प्य॥ ततो गुरुमंत्रेणाधिरसि गुरुपात्राऽमृतेन गुरुपादुका

ॐ

का॰प
४६

46

त्रिधासंतर्प्य॥ एवंपरमगुरूपरमाचार्यादीन्संतर्प्य॥ श्रीपात्रात्मृ
तेनदेवींसायुधांसवाहनांसपरिवारांसंतर्प्ययामिनमः॥ हृदिसंत
र्प्पयेत॥ इतिकलशपूजाविधिः॥ श्रीगुरुंत्रिःसंतर्प्य॥ स्वहृदिमूलांते
कालिकांभगवतींतर्प्ययामिनमः॥ त्रिःसंतर्प्य॥ हेतुनाकरतलसं
मार्ज्य॥ दक्षहस्तेहेतुनात्रिकोणंविलिख्य॥ कोणत्रयमध्येचशुद्धिं
संस्थाप्य॥ मूलांतेह्रीं श्रीं आत्मतत्वेनस्थूलदेहंशोधयामिस्वाहा

श०त
४६

वामस्थांस्वीकृत्य॥ ह्रींश्रीसर्वतत्वेनग्राश्रयाश्रयंजीवंशोधयामिस्वा
हा॥ मध्यस्थांस्वीकृत्य॥ वस्त्रेणाकरौसंशोध्य॥ सर्वांगंमार्जयेत् ॥ अथ
पीठपूजा॥ ॐमंडूकायनमः॥ ॐकालाग्निरुद्रायनमः॥ ह्रींग्राधार
शक्तयेनमः॥ मूलप्रकृत्यैनमः॥ ॐकमठायनमः॥ ॐशेषायनमः
ॐपृथिव्यैनमः॥ ॐसुधांबुधयेनमः॥ ॐमणिद्वीपायनमः॥ ॐचिंता
मणिगृहायनमः॥ ॐरत्नवेदिकायैनमः॥ ॐमणिद्वीपायनमः

२७

का॰प
४७

47

ॐनानामुनिगणेभ्योनमः॥ ॐनानादेभ्योनमः॥ ॐधर्मायनम
:॥ ॐज्ञानायनमः॥ ॐवैराग्यायनमः॥ ॐअनैश्वर्यायनमः ॐ
अनैश्वर्यायनमः॥ ॐशेषायनमः॥ ॐपद्मायनमः॥ ॐप्रकृतिम
यपत्रेभ्योनमः॥ ॐविकृतिमयकेशरेभ्योनमः॥ ॐपंचाशद्बीजभू
षितकर्णिकायैनमः॥ ॐसूर्यमंडलायनमः सोममंडलायनम
:॥ वैश्वानरमंडलायनमः॥ संसत्वायनमः॥ रंरजसेनमः ॐतं

पुरु
४७

तमसेनमः॥ ॐ ग्रंग्र्यात्मनेनमः॥ ॐ ग्र्यांग्रंतरात्मनेनमः ॐ पंपरमा
त्मनेनमः॥ ॐ ह्रीं ज्ञानात्मनेनमः॥ ॐ मेधायेनमः॥ ॐ प्रज्ञायेनमः
ॐ प्रभायेनमः॥ ॐ विद्यायेनमः॥ ॐ धियेनमः॥ ॐ धृत्येनमः ऍविद्व
पायेनमः॥ ॐ ह्सौंः सदाशिवमहाप्रेतपद्मासनायनमः॥ इतिपीठपू
जांश्रीचक्रोपरिविधाय॥ तदुपरि श्रीमच्छ्रीकालिकाभगवतीमूर्त्तिंपरि
कल्पयामिनमः॥ इतिध्यानोक्तांमूर्त्तिंपरिकल्प॥ मूलेनश्रीकालिकाभ

ॐ

का॰ प॰
४८
48

गवलीपुष्पांजलिनापूजयामिनमः॥ इतिसंपूज्य॥ पुष्पांजलीगृहीत्वा
स्वहृद्कमलांतेजोरूपांदेवेशी॥ महापद्मवनांतस्थेकारणानंदविग्र
हे॥ सर्वभूतहितेमातरेह्येहिपरमेश्वरी॥ ॐदेवेशीभक्तिसुलभेपरिवा
रसमन्विते॥ यावत्त्वांपूजयिष्यामितावत्त्वांसुस्थिराभव॥ इत्यावाह्य वह्
न्यामनासापुटाध्वनाकरस्थपुष्पांजलौसमानीय॥ पूजायंत्रमध्येकल्पि
तमूर्त्तौब्रह्मरंध्रेसन्निवेश्यशिवोपरिस्थिता॥ देवेशीमहाकालभैरवसहि

तांसर्वावयवभावेनसंचिंतयेत्॥ ततोमूलमुच्चार्य॥ मूलं श्रीमच्छ्री
कालिकाभगवती॥ इहागच्छ॥ २॥ इह संतिष्ठ॥ २॥ इह संनिधत्स्व २
इह सन्निरुद्धा भव॥ २॥ मूलं श्रीमच्छ्रीकालिकाभगवतीममसर्वोप
चारसहितपूजांगृहाणगृहाणस्वाहा॥ इत्यावाहनादिमुद्राप्रदर्श्य हुं
मित्यवगुंठ्य॥ षडंगेनसकलीकृत्य॥ परमीकृत्य॥ मूलमुच्चार्य
सामान्यार्घोदकेनदेवीत्रिः संप्रोक्ष्य॥ देवीहृदयेमूलेनजीवंसंस्थाप्य

७५

का॰प
४५
49

लेलिहानमुद्रया प्राणप्रतिष्ठां कुर्यात्॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हं
सः सोहं श्रीकालिकाभगवती प्राणा इह प्राणाः॥ ३६॥ जीव इह स्थितः
॥ ३६॥ सर्वेन्द्रियाणि इह स्थितानि॥ वाङ्मनस्त्वक्चक्षुः श्रोत्रघ्राणाद्यागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥ इति प्राणप्रतिष्ठां विधाय॥ योनिपद्मखड्ग
कपालकर्तृकमुद्रां प्रदर्श्य॥ पुष्पांजलिं गृहीत्वा॥ मूलमुच्चार्य॥ श्रीम
च्छ्रीभगवती कालिके पुष्पं प्रतीच्छ हुं फट् स्वाहा॥ इति पुष्पांजलित्रयं द

त्वा ॥ मूलमुच्चार्य्य ॥ वामांगुष्ठनामिकाभ्यां श्रीपात्रविंदुभिः श्रीकालि
काभगवतीपादुकांस्तर्पयामिनमः ॥ इतित्रिः संतर्प्य ॥ आसनादिषो
डशोपचारान्कुर्यात् ॥ यथा ॥ मूलं श्रीमच्छ्रीभगवतीकालिके तुभ्यमिद
मासनंकल्पयामिनमः ॥ ॐ ह्रूं ह्रूं ह्रूं इदमिदं गृहाण स्वाहा ॥ इतिसार्घ्यनी
मुद्रयानिवेद्य ॥ मूलं श्रीमच्छ्रीभगवतीका[illegible] त्वा मूलं श्रीका
लिकाभगवतीपादुकांस्तर्पयामिनमः ॥ मूलं कालिकाभगवत्यैपाद्यंप

ॐ

का.प.

५०

50

रिकल्पयामिनमः॥ इतिपादयोः॥ पाद्यपात्रात्पाद्यं॥ मूलंकालिकाभगव

त्यैमधुपर्कंपरिकल्पयामिस्वधा॥ इतिमधुपर्कपात्रात्मुखेमधुपर्कं मू

लंश्रीकालिकाभगवत्यैआचमनीयंपरिकल्पयामिस्वधा॥ पुनर्मुखेआच

मनीयं॥ मूलंकालिकाभगवत्यैस्नानीयंपरिकल्पयामिनमः इतिनानाती

र्थोदकैः सर्वांगेस्नानं॥ इतिसुस्नाप्य॥ शुद्धदुकूलेनांगंप्रोंछ्यकालागुरुधूपेन

केशान्संशोध्य॥ विचित्रपट्टवस्त्रकुंकुमकस्तूरीचंदनसिंधूरमकुरकुंडल

रत्नयादिनूपुरमंजीरदर्पनादिनानालंकारानदत्वा॥ मूलं श्रीकालि
काभगवत्यै आचमनीयं स्वधा॥ इति पुनराचमनीयं दद्यात्॥ पुनः म
ध्यमांगुष्ठाभ्यां मूलं महाकालभैरवसहितायै श्रीकालिकाभगवत्यै गं
धं परिकल्पयामि नमः॥ ललाटे तिलकं कुर्यात्॥ ततोंगुष्ठतर्जनी
भ्यां मूलं श्री महाकालभैरवसहितायै श्रीकालिकाभगवत्यै अक्षत पु
ष्पानि वौषट्॥ इति पुष्पैः संपूज्य॥ ततो धूपपात्रं स्वाग्रे संस्थाप्य॥ अस्त्राग

ॐ

फट् ॥ इति मंत्रेण सामान्यार्घोदकेन संप्रोक्ष्य ॥ वामतर्जिन्या संस्पृशेत्
पात्राऽमृतेन धूपं निवेदयामि ॥ इति निवेद्य ॥ ॐ जगद्ध्वान्ति मंत्रमातः स्वाहा
इति घंटां संपूज्य ॥ वामेन पाणिना तां वादयन् ॥ मध्यमानामांगुष्ठाग्रैः धूप
पात्रं धृत्वा ॥ ततो गायत्री मूलमंत्रं च पठेत् ॥ ॐ वनस्पतिरसोत्पन्नो गं
धाढ्यो गंधसंयुतं ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ इति त्रिधोः
तोल्य देवी धूपयेत् ॥ ततो दीपपात्रं स्थापन् ॥ दीपं निवेदयामीति श्रीपात्रामृ

नेन निवेद्य ॥ सर्ववन्तु घंटां वादयन् ॥ दीपमंगुष्ठेन धृत्वा दर्शयन् सर्ववन्
गायत्रीमूलं पठन् ॥ ॐ सुप्रकाशो महादीपः सर्वत्र तिमिरापह संबाह्या
भ्यंतर ज्योति दीपोयं प्रतिगृह्यतां ॥ इति दीपं दद्यात् ॥ ततः स्वर्गादि पात्रे
कुंकुमेन वस्त्रपात्रं चंद्र स्वरूपं कृत्वा ॥ मध्ये दीपमेकमष्टपत्रेषु दीपाष्टकं
संस्थाप्य ॥ मूलमंत्रेण प्रज्वाल्य ॥ श्रीं सौंः ग्लूं स्लूं म्लूं क्लूं न्लूं सौंः श्रीरत्नेष
यै नमः ॥ स्थालकं मस्तकांतमुद्धृत्य ॥ नववारं मूलं च पठित्वा ॥ गाय

त्रीं पठित्वा ॥ ममस्वचक्रचक्रेशियुतेदेविनवात्मकं ॥ ग्वारार्तिकमिदं दे
वी गृह्णाराममसिध्यये ॥ इतिचक्रमुद्रयानीराजयेत् ॥ ततोनानानैवेद्य
स्वर्णादिपात्रेनिक्षिप्य ॥ नमइतिग्रभ्युक्ष्य ॥ हुमित्यवगुंठ्य ॥ धेनुमुद्रयामृ
तेनामृतीकृत्य ॥ मूलंसप्तधाजप्त्वा ॥ वामांगुष्टेननैवेद्यपात्रंस्पृशन्
मूलांते ॥ हेमपात्रगतंदिव्यंपरमान्नंसुसंस्कृतं ॥ पंचधाषड्रसोपेतं
गृहाणपरमेश्वरी ॥ ॐस्फारत्सौरभ्यनिर्भरं रुचिकरंशाल्योदनंनिर्म

लं॥ युक्तं हिंगुमरीचजीरसुरभिः द्रव्यान्वितैर्व्यंजनैः॥ पक्वान्नेनस
पायसेन मधुरं दध्याज्यसंमिश्रितं॥ नैवेद्यं सुरसुंदरी रूचिकरं श्रीका
लिके त्वत्प्रियं॥ इति नैवेद्यं॥ मूलं श्रीकालिकाभगवत्यै आचमनीयं परि
कल्पयामि॥ इत्याचमनीयं दत्वा॥ ग्रासमुद्रां प्रदर्शय॥ यथा॥ ॐ प्राणा
य स्वाहा॥ ॐ व्यानाय स्वाहा॥ अपानाय स्वाहा॥ समानाय स्वाहा उदा
नाय स्वाहा॥ व्यानाय स्वाहा॥ प्रणावयुक्तं॥ मूलं अमृतोपस्तरणमसि

ॐ

त्ति पुनराचमनीयं दत्वा ॥ मूलं श्रीमच्छ्रीमहाकालभैरवसहितायै
श्रीकालिकाभगवत्यै कर्पूरादियुक्तां वलिं निवेदयामि नमः इ
त्ति तां वलिं दद्यात् ॥ सर्वेषामर्घपात्रजलेन उत्सर्गः कार्यः ततः त
त्वमुद्रया श्रीपात्रामृतेन मूलं महाकालभैरवसहितां सायुधां सवा
हनां सपरिवारां सावरणां श्रीमत्कालिकाभगवतीं तर्पयामि नमः
इति त्रिः संतर्प्य ॥ मूलं प्रसन्नायै श्रीकालिकाभगवत्यै नमः इति

ध्यांजलिनासंपूज्य॥ इतिसुप्रसन्नांदेवेशींविभाव्य॥ सकलीकृत्य द्र
वींक्तमुद्राप्रदर्श्य॥ योनिहृदि॥ क्षोभनीमुखे॥ द्रावणीभ्रूमध्ये आ
कर्षणीललाटे॥ वशिनीब्रह्मरंध्रे॥ आह्लादिनी॥ पंचमुद्रामयीप्रदर्श्य
कृत्वांजलिः॥ श्रीमत्कालिकाभगवतीआवरणांतिपूजयामिनमः
इत्याज्ञांगृहीत्वाआवरणपूजामारभेत्॥ यथा॥ ततोदेवीदक्षिणाभा
गेनचर्वणायुतभैरवपात्रामृतेनतत्वमुद्रयाश्रीमहाकालभैरवं

ॐ

का॰प
५४
54

जयामितर्पयामिनमः॥ ततोदेवीदक्षिणाभागेवायव्यादीशानपर्य्यं
तंपंक्तिक्रमेणविभाव्य॥ महानंदेवानंदश्रीपादुकांपूजयामितर्प
यामिनमः॥ इतिसंपूज्य॥ चर्वणाघुततत्त्वमुद्रयाभैरवामृतेनगुरुं
संतर्प्य॥ ॐऐंह्रींश्रींश्रीमच्छ्रीपरमानंदनाथश्रीपादुकांपूजयामि
तर्पयामिनमः॥ परमगुरुश्रीपादुकां॰॥ परापरगुरुश्रीपादुकां
॰॥ दिव्यौघगुरुश्रीपादुकां॰॥ सिद्धौघगुरुश्रीपादुकां॰ मानवौ

शि॰त
५४

घगुरुश्रीपादुकांपूजयामितर्पयामिनमः ॥ इतिगुरुपात्राऽमृतेन
चर्वयुततत्वमुद्रयागुरुंसंतर्प्य ॥ ततोपंचदशकोणेगुह्देवीसंतर्प्य
प्रथमत्रिकोणे ॥ ॐकाल्यैपादुकांपूजयामितर्प्पयामिनमः इ
तित्रिकोणाग्रे ॥ कपालिन्येपूजयामितर्पयामिनमः ॥ दक्षे कुल्ला
येश्रीपादुकांपूजयामितर्प्पयामिनमः ॥ वामे ॥ इतियोगनीपात्राऽ
मृतेनत्रिःसकृद्वासंतर्प्य ॥ तत्रवह्नित्रिकोणेद्वितीये ॥ कुरुकुल्यायै

ॐ

का॰प॰

५५

श्रीपादुकांपू॰ ॥ विरोधिन्यै श्रीपादु॰ ॥ विप्रचितायै श्रीपादु॰ इति संपूज्य संतर्प्य पूर्ववत् ॥ तद्वहिस्तृतीयत्रिकोणाग्रे ॥ उग्रायै श्रीपादुकांपू॰ ॥ ॐ उग्रप्रभायै श्रीपादु॰ ॥ ॐ दीप्तायै श्रीपादु॰ ॥ इतिसंपूज्य तद्वहिश्चतुर्थत्रिकोणे ॥ ॐ नीलायै श्रीपादुकांपू॰ ॥ ॐ घनायै श्रीपादुकां॰ ॥ ॐ वलायै श्रीपादु॰ ॥ पूर्ववत्संपूज्यसंतर्प्य ॥ तद्वहिःपंचमत्रिकोणे ॥ ॐ मात्रा श्रीपादु॰ ॥ ॐ मुद्रा श्रीपादु॰ ॥ ॐ मिता श्रीपादु॰ इ

शिव

५

तिसंपूज्य ॥ योगनीपात्राऽमृतेन संपूज्य ॥ ऽनाशपामाऽप्रमिक
रामुंडमालाविभूषिता ॥ तर्जनीवामहस्तेन धारयंतीसुचिस्मि
ता ॥ ॐ ह्रां हृदयायनमः ॥ ह्रीं शिरसे स्वाहा ॥ ह्रूं शिखायै वौषट् ह्रैं
कवचाय हूं ॥ ह्रौं नेत्रत्रयाय वौषट् ॥ ह्रः अस्त्राय फट् ॥ नमः इति
पूर्वादिदिक्षुदेव्यग्रे ॥ ततोऽष्टदलेषु पूर्वादिक्रमेणाऽप्रष्टशक्तीः ध्याा
त्वा संपूज्य ॥ संतर्पयेद्यथा ॥ ॐ ब्राह्मीश्री पादुकां तर्पयामि नमः

२५७

का॰प
५६

56

इंनारायनीश्रीपादुकांतर्पयामिनमः॥ अग्निदले॥ ॐमाहेश्वरीश्री
पादुकांपूजयामितर्पयामिनमः॥ दक्षिणादले॥ ॐचामुंडाश्री॰
नैऋत्ये॥ ॡंकौमारीश्री॰॥ पश्चिमदले॥ ऐंअपराजिताश्री॰ वाय
व्यदले॥ ॐवाराहीश्री॰॥ उत्तरदले॥ ग्रंःनारसिंहीश्री॰ ईशानद
ले॥ इतिसंपूज्य॥ पुनरपिविंदौ॥ पूर्ववत्देवींसंपूज्यसंतर्प्य मु
द्रांप्रदर्श्य॥ पुष्पांजलित्रयेनसंपूज्य॥ नित्यहोममाचरेत्॥ नि

मूल

शिव
२५६

त्पहोमेऽग्न्यानयनादिकंनास्ति॥ इतिवशिष्ठसंहितोक्तत्वात्
लौकिकाग्निमानीय॥ मूलेनदर्भकाण्डप्रज्वाल्य॥ नैरृत्यांदिशि
निक्षिपेत्॥ ततः मूलंफट् अग्निंपरिषिंच्यपरिषिंचामि इत्यग्निं
सामान्यार्घजलेनसंप्रोक्ष्य॥ मूलंफट् यत्तस्यत्वासंनमैःतृणामि
फट्॥ इतिदर्भानपूर्वत्रीनदक्षिणापंचउत्तरेपंचपश्चिमेत्रीनदत्वा
ॐरंरंरंवैश्वानरंप्रज्वाल्ये॥ स्वाहिनमः॥ इत्यग्निमावाह्य॥ मूलेनगंध

ॐ

का०प
५७
57

पुष्पाभिः संपूज्य ॥ ततः शङ्खमावाह्यानीय ॥ मूलेन सामान्या
र्घजलेनाभ्युक्ष्य ॥ हुमित्यवगुण्ठ्य ॥ अमृतमुद्रयाऽमृतीकृत्य
अधोमुखं संस्थाप्य ॥ शिवाय नमः ॥ शक्तये नमः ॥ इति पुनः सं
पूज्य ॥ मूलेनापि संपूजयेत् ॥ ततो घृतमानीय ॥ मूलेनाप्युप
रि संस्थाप्य ॥ हुमित्यवगुण्ठ्य ॥ अमृतीकृत्य स्थण्डिले संस्था
प्य ॥ मूलेन संपूज्य ॥ षडङ्गेन प्रपूज्य आदर्शनं कुर्याद्यथा अं

शिवु

ज्यंतेजः समुद्दिष्टमाज्यंपापहरं परं ॥ आज्येसुराणामाहारः आज्येलोकः प्रतिष्ठिताः ॥ दिव्यंतरिक्षभौमाद्येयत्तेकिल्बिषमागतं ॥ तत्सर्वमाज्यस्पर्शेनविनाशमुपगच्छति ॥ आत्मनोवाङ्मनःकायोपार्जितपापनिवारणार्थंदिव्यंतरिक्षभूमौपापनिवारणार्थं ॥ कालिकाभगवतीप्रीत्यर्थं ॥ इदमाज्यंसमर्पयामिनमः इत्याज्यदर्शनंकृत्वा ॥ मूलेनअवमाज्येनाप्यर्ज्य ॥ अवोपरिअवं

ॐ

कृत्वा ॥ मूलेन पूर्णाहुतिं दद्यात् ॥ ततो देवीमग्न्युपर्य्यावाह्य ॥ गंधादिभि
ः संपूज्य ॥ होमं कुर्याद्यथा ॥ तत्रादौ प्राणाय स्वाहा ॥ ॐ अपानाय
स्वाहा ॥ ॐ समानाय स्वाहा ॥ ॐ उदानाय स्वाहा ॥ ॐ व्यानाय स्वाहा
इति कृत्वा ॥ मूलेन शतं सहस्रं वा होमं कुर्यात् ॥ मूलेन स्रुवमाज्ये
न संपूर्य्य ॥ स्रुवमुपरि संस्थाप्य ॥ पूर्णाहुतिं दद्यात् ॥ ततः स्रुवं सा
मार्घ्यजलेन पूर्णं कृत्वा ॥ ॐ फट्ऽग्निं विमुंचामि फट् इत्यग्निं संपूज्य
न्य

ॐ फट् यज्ञस्य संततिरसि ॥ यज्ञस्य त्वां संतत्यै विसर्जयामि फट् इ
ति नैरृत्यां निक्षिपेत् ॥ ॐ आग्नेरीशानकोणात् ॥ भस्म गृही
त्वा ॥ स्वललाटे तिलकं कुर्याद्यथा ॥ ॐ अग्निरिति भस्म ॥ जलमि
ति भस्म ॥ स्थलमिति भस्म ॥ ॐ वायुरिति भस्म ॥ व्योमेति भस्म ॥ आकाशमि
ति भस्म ॥ ॐ सर्वं ह वा इदं भस्म पूतो भवति ॥ ॐ अपेयपानात्पू
तो भवति ॥ अभक्ष्यभक्षणात्पूतो भवति ॥ ॐ अगम्यागमनात्पूतो भ

ॐ

का॰ प

५९

59

वति ॥ ॐ शिवमस्तु ॥ ॐ यन्मानस्य च्छिद्रमाभूत्कदाचन ॥ देवदेव्यो

प्रसादेन रत्नाद्रत्नमस्तु मे भृशं ॥ इति स्वललाटे तिलकं कृत्वाऽग्रे पुष्पं

दद्यात् ॥ ॐ नमस्स्वमंत्रनाथाय नित्यानंदमयाय च ॥ धर्मार्थ

काममोक्षाय पुनरागमनाय च ॥ इत्यग्रे पुष्पं दत्वा ॥ संहारमुद्र

यात त्तेजः स्वहृदि वामनासारंध्रेण देवीचिदग्नौ संयोजयेत् ॥ इति

नित्यहोमविधिः ॥ अथ यदा तावत्कर्तुमशक्तिस्यात्तदा चरणाहोमं कुर्या

शिव

५९

त् ॥ इति नित्यहोमं विधाय ॥ वलिपात्रेण वटुकादिवलिं दद्यात्

॥ यथा ॥ तत्र चक्रस्येशानकोणे चतुरस्रवृत्तत्रिकोणात्मकं मं

डलं विधाय ॥ गंधादिभिः संपूज्य ॥ ॐ ऐं ह्रीं श्रीं ऐह्येहि देवीपुत्र वटुक

नाथ कपिलजटाभारभास्वर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय

२॥ सर्वोपचारसहितं वलिं गृह्ण गृह्ण स्वाहा ॥ इति वामांगुष्ठानामि

काभ्यां वलिपात्राद्वलिं दद्यात् ॥ इति वटुकवलि ॥ अनयेन तथैव मंड

२४
का॰प
६६०

लंकृत्वा ॥ तत्रसाधारं पात्रं जलेनिधाय ॥ यंयोगनीभ्योनमः ॥ इति
गंधादिभिःसंपूज्य ॥ ॐ ऊर्ध्वब्रह्मांडतोवादिविगगनतलेभूतलेनि
तलेवा ॥ पातालेवातलेवासलिलपवनयोर्यत्रकुत्रस्थितोवा क्षेत्रे
पीठोपपीठादिषुचकृतपदाधूपदीपादिकेना ॥ प्रीतादेव्यासदानःशु
भविधिवलिनापालुवीरेंद्रवंद्या ॥ यांयोगिनीभ्योनमः ॥ सर्वयोगिनी
भ्योहुंफट् ॥ इतिवामांगुष्ठमध्यमानामिकाभिःवलिमुत्सृजेत् इतियो

शिव
६६

गिनीवलिः॥ ततोनैरृतेतथैवमंडलंकृत्वा॥ तत्रसाधारेजलपा
त्रेसंस्थाप्य॥ ह्रांक्षेत्रपालायनमः॥ इतिगंधादिनासंपूज्य ॐह्रां
ह्रींह्रूंह्रैंह्रौंह्रः॥ स्थानेक्षेत्रपालधूपदीपादिसहितंवलिंगृह्णगृह्णस्वा
हा॥ ॐयस्मिन्क्षेत्रेनिवासीचक्षेत्रपालःसकिंकरःसुप्रीतोवलिदाने
नसर्वरक्षांकरोतुमे॥ इतिवामांगुष्ठतर्जनीभ्यांवलिमुत्सृजेत्
इतिक्षेत्रपालवलिः॥ ततोवायव्येपूर्ववत्मंडलंकृत्वा॥ तत्रसाधारंस

९७

का॰प॰
६१
61

जलंपात्रंसंस्थाप्य ॥ गंगणपतयेनमः ॥ इतिगंधादिनासंपूज्य
गांगींगूंगणपतयेवरवरदसर्वजनंमेवशमानयस्वाहा वामांगु
ष्ठमध्यमाभ्यांवलिमुत्सृजेत् ॥ इतिगणपतिवलिः ॥ ततः उत्तरे
चतुरस्रंत्रिकोणात्मकंमंडलंविधाय ॥ ॐमूलंश्रीमत्कालिकाव
लिमंडलायनमः ॥ इतिसंपूज्य ॥ ॐतदुपरिसाधारंजलंशरापा
त्रंसंस्थाप्य ॥ मूलंश्रीमत्कालिकावलिद्रव्यायनमः ॥ इतिगंधा

शिव
६१

दिना संपूज्य ॥ ततो बलिपात्राद्बलिद्रव्यं ततनिक्षिपेत् । इति नित्य
पूजांते बलिद्रव्यैर्बलिं दद्यात् ॥ यथा ॥ तत्रादौ मूलेन पशुमानीय
पाद्यगंधादिभिरलंकृत्य ॥ देव्यग्रे संस्थाप्य ॥ मूलेन प्रोक्षणीयजलेन
लेन संप्रोक्ष्य ॥ अस्त्राय फट् ॥ इति संरक्ष्य ॥ हुमित्यवगुंठ्य । मूलेन
धेनुमुद्रया ऽमृतीकृत्य ॥ ॐ ऐं ह्रीं श्रीं सर्वदेवतातृप्तिरोबलिर्नाय
इति गंधादिना त्रिः संपूज्य ॥ तस्य दक्षकर्णे ॥ ॐ पशुपाशाय विद्महे

९४

काप॰
६२

62

।विघ्नकराणायधीमहितन्नोजीवः प्रचोदयात्॥ इतिपशुगायत्री
त्रिः पठित्वा॥ ॐह्रींहूंफट्शिवस्वरूपंगच्छंतुस्वाहा॥ ॐजूंसः हसन
मलवरयुऊंशिवस्वरूपंगच्छंतुस्वाहा॥ ॐह्रींकालिकालिकालिवज्रे
श्वरीलोहदंडायैनमः॥ इतिगंधादिनात्रिरभ्यर्च्य॥ तस्यमुष्टौ
ॐऐंह्रींश्रींवागीश्वरीब्रह्माभ्यांनमः॥ मध्येलक्ष्मीनारायणाभ्यां
नमः॥ अग्रेउमामहेश्वराभ्यांनमः॥ इतिसंपूज्य॥ तांधृत्वामंत्र

शिव
६२

येत्॥ ॐ खड्गाय सुरनाथाय देवकार्यार्थतत्परः॥ पशुश्छेद्यस्त्वया
शीघ्रं खड्गनाथ नमोस्तु ते॥ इत्यभिमंत्र्य॥ गंधाक्षतजलादिकमादा
य॥ मूलं॥ अद्येत्यादि अमुकमासेत्यादि॥ अमुकगोत्रः अमुकश
र्माहं अमुकश्रीकालिकाभगवती इमं पशुं तुभ्यं समर्पयामि नमः
हं संभ्रमीद इति पठित्वा॥ पशोः शिरसि निक्षिपेत्॥ शिरो धृत्वा यज्ञा
र्थं पशवः सृष्टाः यज्ञार्थं पशुघातनं॥ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे

वधोवधः॥ शिवायनमिदंपिंडमतस्त्वांशिवतांगतः॥ उद्बुध्यस्व
पशोत्वंहिनाशिवस्त्वंशिवोसिहि॥ इतिसंबोधयित्वा॥ खड्गमादा
य॥ सौः अस्त्रायफट्छिंदिछिंदिस्वाहा॥ इतिखड्गंतस्यस्कंधेयोज
येत्॥ ततःस्वयंदेवीरूपोभूत्वा॥ निर्विकल्पः॥ एकेनप्रहारेण
छिंद्यात्॥ सविकल्पः॥ परहस्तेनछेदयेत्॥ नत्रैवब्राह्मणातिरि
केखस्त्रादिवलिंदद्यात्॥ इतिवलिदानविधिः॥ इत्येवंवलिदानवि

धाय॥ मूलेनदेवीं संपूज्य॥ रक्तममृतं नाळन्यपेतेन रक्तेन मूलं स्मर

देवीं संतर्प्य॥ वटुकेभ्यो रक्तं निक्षिप्य॥ देवीं नमस्येत्॥ अथ कुमारी

पूजनं॥ सर्वलक्षणासंपन्नां सुस्नातां सपरिष्कृतां सवासां कन्यामा

नीय॥ तस्याः पादौ प्रक्षाल्य॥ सूक्ष्मवस्त्रेणामार्जयित्वा॥ पूजापीठे

समुपविश्य॥ संक्षेपतो पूजां विधाय॥ तत्रोपविष्टायां तस्यां मू

लेन देवीमावाह्य॥ मूलेन गंधपुष्पादिभिः॥ तस्याः पादौ संपूज्य

ॐ

का॰प

६४

64

दीपान्नैरुपचारैः सम्भपर्च्य ॥ तां देवीं त्र्यंधयायन् ॥ यथोचितां भोजयित्वा-

तांबूलं दत्वा ॥ वस्त्रालंकारदक्षिणादिकं यथाशक्तिं दत्वा विसर्जयेत् इति

कुमारीपूजा ॥ ततो गुरुदेवौ ध्यायन् ॥ प्राणायामऋष्यादि करषडंगध्या-

नानि कृत्वा ॥ पूर्वोक्तविधिना यथाशक्तिजपं कुर्यात् ॥ पुनः प्राणायामा-

दि नाकृत्वा ॥ गुह्यातिजपं देव्या हस्ते समर्प्य ॥ कवचनामसहस्रस्तोत्रपा-

ठादीनां पाठं निवर्त्य ॥ गुरुस्तोत्रमपि पठित्वा ॥ सर्वमांगलमांगल्येऽशि

शिव

६४

वेसर्वार्थसाधके॥ शरण्ये त्र्यंबके गौरीनारायनी नमोस्तुते इतिच
तुर्धाप्रदक्षिणीकृत्य॥ अपराधोभवत्येवस्सेवकस्यपदेपदे कोपरः
सहते लोके केवलं स्वामिनं विना॥ अपराधसहस्राणि क्रियन्तेहर्निशं
मयादासमस्वमस्मिदं सर्वमिति मानदासमस्वमे॥ इत्यष्टांगं प्रणिपत्य
सामान्यार्घोदकेनांबूलकेन गृहीत्वा॥ पूर्ववत्प्राणा बुद्धिदेह धर्मा
धिकारतोजाग्रत्स्वप्नसुषुप्तिवस्थासु मनसा वाचा कर्मणापद्भ्यामुद

ॐ

का॰प॰
६५

65

रेराशिज्ञायत्स्मृतंयदुक्तंयत्कृतंतत्सर्वंमामदीयंश्रीकालिकाभगव
तीचरणाकमलेसमर्पयामिनमः॥ सामान्यार्घोदकंसामर्थ्यंज
लिंवध्वापठेत्॥ यद्दत्तंभक्तिमात्रेणपत्रंपुष्पंफलंजलंनिवेदितंचनै
वेद्यंतद्गृहाणानुकंपया॥ ॐआवाहनंनैवजानामिनजानामिविस
र्जनं॥ पूजाभागंनजानामि॥त्वम्पतांपरमेश्वरि॥ देवीदात्रीचभोक्त्री
चदेवीसर्वमिदंजगत्॥ देवीजयतुसर्वत्रयादेवीसोहमेवहि यद्दत्त

शिव
६५

र पदभ्रष्टंमात्राहीनंचयमतं ॥ मयादासेनयत्नाश्चंन्नम्पतां परमेश्वरी
मंत्रहीनक्रियाहीनंविधिहीनंचयत्कृतं तत्सर्वंकृपयादेवीगृहाणाराधनं
मम ॥ प्रातःप्रभृतिसायांतंसायात्प्रातरंततः ॥ यत्करोमिजगद्योनित
दस्तुतवपूजनं ॥ नमस्तेदेवदेवेशिकालिकेपरमेश्वरी ॥ तवपादांबुजेनि
त्यंनिश्चलाभक्तिरस्तुमे ॥ देवीपुष्पांजलिनाह्ममाप्य ॥ ततःसर्वंसमु
त्याप्य ॥ साधुवासाधुवाकर्मयद्यदाचरितंमया ॥ तत्सर्वंकृपयादेवीगृहा

ॐ

का॰प॰
६६
66

णाराधनंमम ॥ इतिगंधवत्रिः परिभ्राम्य ॥ तज्जलंदेवीदक्षहस्तेसमर्प्य ॥ पुनःतज्जलेनवामहस्तेनगृहीत्वा ॥ शंखंस्वस्थानेसंस्थाप्य तज्जलंस्वमंत्रेणसंमंत्र्य ॥ तेनजलेनसप्तधामूलंपठन्स्वसरीरं संप्रोक्षयेत् ॥ ततःपुष्पांजलिंगृहीत्वा ॥ गच्छगच्छपरंस्थानंस्वस्थानंपरमेश्वरि ॥ यत्रब्रह्मादयोदेवानविदुःपरमंपदं ॥ इतिदेवीविसृज्य संहारमुद्रयानिर्माल्यपुष्पमाघ्राय ॥ तिष्टतिष्ठ परंस्थानंस्वस्थानंपरमेश्वरि य

शिव
६६

त्वत्प्रसादाद्यो देवासुरास्तिष्ठंतु मे हृदि ॥ इति षष्ठीचक्रं तेजोरूपां देवीं मनसो

त्थाप्य ॥ संहारमुद्रया निर्माल्यं गृहीत्वा ॥ वामनासया घ्राय तां तेजोरू

पां शिवसमीपं नीत्वा ॥ तयोरैक्यं विभाव्य ॥ ततस्तयोर्मध्ये देवीं सुषुम्णामा

र्गेणा स्वहृदि समानीय ॥ तत्र यथोक्तरूपां स्थापयेत् ॥ ततश्चंडेश्वराय नम

: ॥ इति निर्माल्यं संस्थाप्य ॥ ईशाने त्रिकोणं मंडलं रचय ॥ तत्र ॥ ॐ ह्रीं उच्छि

ष्टचांडालिनी सर्वेतत्त्ववशंकरी स्वाहा ॥ इति उच्छिष्टचांडालिनीं निर्माल्येन

ॐ

का॰प॰
६७

६७

संपूज्य ॥ ॐ लेह्यचोष्यान्नपानादि तांबूलं स्रग्विलेपनं निर्माल्यभो
जनं तुभ्यं ददामि श्रीशिवाज्ञया ॥ नैवेद्यस्य शतांशानि र्माल्यपुष्पेन स
हिततस्यै दत्वा ॥ तालत्रयपूर्वकं तां विसृजेत् ॥ ॐ देवनाथगुरो स्वामीदे
शिकस्वात्मनायक ॥ त्राहि त्राहि कृपासिंधो पूजां पूर्णांतरां कुरु॥ इति गु
रुं प्रणम्य ॥ श्रीपात्रमुत्थाप्य मस्तक मुद्धृत्य गुरु मंत्रेण गुरवे समर्प्य
पुनस्तत्पात्रं दक्षकरे निधाय ॥ वामहस्ते कृत्वा ॥ तत्त्वमुद्रया श्रीगुरुं त्रिः सं

शिव
६७

तर्प्य ॥ तत्पात्रं स्वस्थाने संस्थाप्य ॥ तज्जलं किंचित्पात्रांतरे निधा
य ॥ मूलं ॥ आत्मतत्वाय नमः ॥ मूलं विद्यातत्वाय नमः मूलं शि
वतत्वाय नमः ॥ मूलं सर्वतत्वाय नमः ॥ इति विन्यस्य ॥ तज्जलं पुनः
पात्रांतरेनोद्धृत्य ॥ चुलकेनादाय ॥ त्रैलोक्यलेकशं जिह्विप्य ओं ह्रें ह्रीं
श्रीं प्रकृति बुध्यहंकार ॥ श्रोत्रत्वक्चक्षुः जिह्वाघ्राणवाक्पाणिपाद
पायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायु अग्निसलिलपृथिव्यात्म

ॐ

का॰प॰
६८

68

काशुद्धचतुर्विंशतितत्वसहितं ॥ ग्रं ग्रां ॥ २४ ॥ मूलं ग्रात्मतत्वात्म
कं स्थूलदेहं शोधयामि स्वाहा ॥ मायाकलाविद्यारागकालनिय
पुरुषात्मक शुद्धाशुद्धतत्वसहितं कं खं ॥ २५ ॥ मूलं विद्यातत्वात्मकं
सूक्ष्मदेहं शोधयामि स्वाहा ॥ शिवशक्तिसदाशिवेश्वरशुद्धविद्या
त्मकं तत्वसहितं ॥ यं रं ॥ ३ ॥ मूलं शिवतत्वात्मकं परदेहं शोधया
मि स्वाहा ॥ शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्या

शिव
६८

रागकालनियतिपुरुषप्रकृतिपुरुषबुद्ध्यहंकारमनःश्रोत्रत्वक्च
क्षुजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाश
वायुवह्निशलिलपृथिव्यात्मकशुद्धमिश्रात्मकषट्त्रिंशतत्वसाहि
तंसमस्तमातृकामुच्चार्यमूलंसर्वतत्वस्थूलसूक्ष्मपराख्यदेहत्रयाभि
मानिनंजीवात्मानंशोधयामि॥ इतिचुलकचतुष्टयंस्वीकृत्य तत्पा
त्रंकराभ्यामादाय॥मूलंगुरुपादुकाविद्यांश्चोच्चार्य॥ॐप्रकाशाकाश

ॐ

का॰प॰
६९

69

हस्ताभ्यामवलंब्योन्मनीक्रचा॥ धर्माधर्मकलास्नेहपूर्णाग्नौ ब्रह्मे जु
होम्यहं स्वाहा॥ इतितज्जलं प्रश्नीयात्॥ ततः कराभ्यां मूर्धादिपादप
र्यंतं षट्त्रिंशतत्वात्मकं तं भावयेत्॥ ततः स्वसामयिकैः सह यथा
शास्त्रं गुरूपदिष्टविधिना पात्रवंदनं कुर्यात्॥ यथा॥ ॐ श्रीमद्भैरव
शेखरप्रविलसच्चंद्रामृतप्लावितं॥ क्षेत्राधीश्वरयोगिनीगणमहासि
द्धैः समाराधितं॥ आनंदागमलंमहात्मकमिदं साक्षात्त्रिखंडामृतं

वंदे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदं ॥ ॐ आत्मतत्त्वं शोधयामि स्वाहा ॥ इति कुलकुंडलिनीमुखे जुहुयात ॥ ॐ ह्रैं मं सिंदुरमाव
हृदयितयादत्तंचपेयादिभिः किंचिच्चंचलरक्तपंकजदृशासानंदमुद्वीक्षितं ॥ वामे स्वादु विशुद्ध शुद्धि कवलं पाणौ विधायात्मकं वंदे
पात्रमहं द्वितीयमधुनानंदैकसंवर्धनं ॥ ॐ विद्यातत्त्वं शोधयामि स्वाहा ॥ ॐ सर्वाम्नायकलाकलापकलितं कोतूहलोद्योतितं चं

ॐ

का॰प
७०
70

द्वैपेंद्र महेंद्र शंभु वरुणा ब्रह्मादिभिः सेवितं ॥ ध्यानं देवगणैः परं मु
निगणैः मोक्षार्थिभिः सर्वदा ॥ वंदे पात्रमहं तृतीयमधुना स्वानंद
बोधक्षमं ॥ ॐ शिवतत्वं शोधयामि स्वाहा ॥ ॐ मद्यं मीनरसाव हं ह
रिहर ब्रह्मादिभिः पूरितं ॥ मुद्रा मैथुन धर्म कर्म निरतं ज्ञानामृतं ति क्षा
श्रयं ॥ आचार्यार्चितमष्टभैरवकलान्यासेन चाराधितं पायात्पंच
मकारतत्वनिलयं पात्रं चतुर्थं नमः ॥ ॐ प्रकृतितत्वं शोधयामि

शिव
७॰

स्वाहा ॥ आधारे भुजगाधिराजवलये पात्रं महीमंडलं मद्यं सप्त
समुद्रवारिपिशितं पार्णोचदिग्दंतिनः ॥ सोहं भैरवमर्चयन्त्रति
दिनं तारागणैोरक्तिते ः ॥ रादित्यप्रमुखैः सुरासुरगणैर्ज्ञात्वा करैः
किंकरैः ॥ ॐ पुरुषतत्त्वं शोधयामि स्वाहा ॥ ॐ छत्रं चामर भद्रपीठ
परमानंदोदयं दायकं ॥ वाजीदंतिमनोहरं सुखकरं साम्राज्य सायु
ज्यदं ॥ नानाव्याधिभवांधकारहरणं जन्मांतरध्वंसनं ॥ श्रीमद्भैरव

ॐ

का॰प॰
७१

७१

भैरवीप्रियतरं पात्रं च यथेष्टं नमः ॥ ॐ मः स्त्वं शोधयामि स्वाहा ६
ॐ जायत्स्वप्नसुषुप्तिबोधपवनं चैतन्यमाहिग्रदं ॥ विद्युद्भास्करवह्नि
चंद्रधनुर्यं ज्योतिस्कलाव्यापितं ॥ वामापिंगलमध्यमत्रिवलयातत्कुंड
लीचोर्द्ध्वगाः ॥ पात्रं सप्तमक्षरसोनन्तरसानंदप्रदं पातु मां ॐ बुद्धित
त्वं शोधयामि स्वाहा ॥ ॐ खड्गं पादुकमञ्जलं सुतिलकं कंठेति सारस्वतं
शत्रोर्वाग्बलसौर्यकार्यहरणं देहस्थितेकारणं ॥ वांछासिद्धिकरं मनः

शिव
७१

स्यितिकरं वशंयगद्योषितां ॥ पात्रंचाष्टमसष्टसिद्धिकरणं प्रोदग्र
सन्नंभजे ॥ ॐ अहंकार तत्वंशोधयामिस्वाहा ॥ ५ ॥ सर्वानंदकरंसदा
शिवपदं सर्वार्थदं संपदं ॥ साम्राज्यार्थकरं समस्तसुखदं चाज्ञानवि
ध्वंसनं आयुष्कांतियशोविवर्धनकरं संसार मोहच्छिदं ॥ पात्रंलक्ष्मा
गरात्मकं चनवमं प्रोदग्रतापंभजे ॥ ॐ शक्तितत्वंशोधयामिस्वा
हा ॥ ६ ॥ ब्रह्माविष्णुमहेशानांदेवानांचविशेषतः ॥ दुर्लभंपावनंपा

ॐ

का॰प॰
७२
72

त्वंदत्वामंप्रणमाम्यहं ॥ ३ ॥ भैरवतत्वंशोधयामिस्वाहा ॥ पापघ्नं शांतिपुष्टिभद्रंदिव्यस्वादुसुखालयं ॥ पात्रमेकादशंवंदेगुरुसेवा सुखागतं ॥ ॐसर्वतत्वंशोधयामिस्वाहा ॥ इतिपात्रवंदनं ॥ अथ पात्रप्रसंसा ॥ पात्रंकृत्वाकरेमंत्रीसर्वकर्मलभेत्सुखी ॥ इहलोके श्रियंभुक्त्वादेहांतेभैरवोभवेत् ॥ देहस्याखिलदेवतागजमुखाद्ये त्राधिपाभैरवा ॥ योगिन्योवटुकाश्चयक्षपितरः ॥ पैशाचकाचेटकाः

शिव
७२

अन्येभूचरखेचराप्रतिपगाः वेतालभूताग्रहाः ॥ तृष्णास्पृंकुल
पुत्रकस्यपिवतः पातंसदीपंचरुं ॥ वामेरामारमणाकुशला
दक्षिणेचालिपात्रं ॥ अग्रेमुद्राचराकवटुकोसूकस्पोहमस्तुधि
ः ॥ तंत्रीवीणासरसमधुरा ॥ सद्गुरुः सत्कथायांकौलोमार्गः
परमगहनोयोगिनामप्यगम्यः ॥ ३ ॥ अलिपिशितपुरंध्री
भोगपूजापरोहं ॥ वहुविधकुलमार्गारंभसंभावितोहं ॥ पशुज

ॐ

का॰प॰ ७३

23

नविमुखोहं भैरवीमाश्रितोहं ॥ गुरुचरणरतोहं भैरवोहं शि
वोहं ॥ ४ ॥ करपात्रंमुखेस्तोत्रमानंदो हृदयांतरे ॥ भक्तिः गुरु
पदांभोजेशरणं किमतः परं ॥ ५ केन पुष्कवटुकेन घटं पिवामि
वापीपिवामि सहसालवणाईकेन ॥ आस्वाद्यमांसगलिलो
हितसुंडखंडगंगांपिवामिजमुनां सहसागरेण ॥ ६ ॥ वामेचंद्र
मुखीमुखेचमदिरापात्रंकरांभोरुहे ॥ मूर्ध्नी श्रीगुरुचिंतनंभग

शिव ७३

वतीध्यानास्यदं मानसं ॥ । जिह्वायां जपसाधनं परिगातिकौलक्र

माभ्यासने ॥ येसंतोनियतं पिबंतिसुरसंतेभुक्तिमुक्तिंगताः

यावन्नचलतेदृष्टिर्यावन्नचलतेमनः ॥ तावत्पात्रंप्रकर्तव्यंपशुपा

नमतःपरं ॥ पीत्वापीत्वापुनःपीत्वायावत्पततिभूतले ॥ उत्थायच

पुनःपीत्वाभूयोजन्मनविद्यते ॥ इतिपात्रप्रशंसा ॥ वहिप्रस्थं

मादिकंपात्रांतेरसंस्थाप्य ॥ वहिर्गत्वा ॥ शुद्धदेशेईशानकोणोत्तको

ॐ

रां विलिख्य ॥ तत्र गदात्रिशूलडमरु[illegible]पाणिं त्रिलोचनं कुंकुमाभं
भैरवं ध्यायेत् सर्वविघ्ननिवारणं ॥ इत्युच्छिष्टभैरवं ध्यायेत् ॥ ॐ ह्रीं
श्रीं उच्छिष्टभैरवागच्छ २ बलिं गृह्ण २ स्वाहा ॥ ॐ उच्छिष्टभैरवमावाह्य अ
नेन मंत्रेण संपूज्य ॥ योनिमुद्रया विसृज्य ॥ पाणिपादौ प्रक्षाल्य
उदयोस्तु [illegible]वनन्यंन प्रविश्य ॥ तत्र स्वासने समुपविश्य ॥ मूलपात्रे श्री
पात्रबिंदुं निक्षिप्य ॥ तेन जलेन स्वात्मानं संप्रोक्षयन् ॥ शांतिस्तोत्रं प

ठत॥ भैरवउवाच॥ देविवक्ष्यामिछ्वजांनेशांतिस्तोत्रमनुत्तमं वाग्यो
नपरानंदपदं प्राप्स्यतिनिस्पृहा॥ योगिनीचक्रमध्यस्थंमातृमंडल
वेष्टितं॥ नमामिशिरसानाथंभैरवंभैरवीप्रियं॥ १॥ अनादिघोरसं
साराव्याधिध्वंसेकहेतवे॥ नमः श्रीनाथवैद्यायकुलौषधिप्रदायिने
आपदोदुरितंरोगासमयाचारलंघनात्॥ येनसर्वंव्यपोहंतुदिव्यच
क्रस्यमेलनात्॥ आयुरारोग्यमैश्वर्यं [illegible]लाभःसुखंजयः॥ कांतिर्म

ॐ

का॰प॰
७५

75

नोरथ्यास्तुपांतुसर्वाश्चदेवताः॥५॥ अंसंप्रजपकानां प्रतिपालका
नांयनीइयोगीइतपोधनानां॥ देशस्यराजस्यकुलस्यराज्ञः करोतु
शांतिंभगवन्कुलेशः॥६॥ नंदंतुशाधककुलान्वयदर्शकायेमृष्ट्वा
घनाख्यचतुरुक्तमहात्वपाये॥ नंदंतुसर्ववकुलान्वयनापरे येष्वन्ते
वि[illegible]शेषपदभेदकशांभवेये॥७॥नंदंतुसि[illegible]गुरवः गुरुशक्र
मोघाः ज्येष्ठानुगासमपिनोवडकः ऊम[illegible]र्यः॥ षड्योगिनी प्रवरवीर

शिव
७५

कुलप्रसूताः॥ नंदंतुभूमिपतयोद्विजसाधुलोका॥८॥ नंदंतुनीति
निपुणानिरवद्यनिष्ठाः॥ निद्रात्मरातिरुपमानिर[illegible]वाञ्छा निन्या
निरंजनरतागुरवोनिरीहा॥ शांतास्त्रशांतमनसोहतशोकशंकाः
९॥ नंदंतुयोगनिरताकुलयोगयुक्ताः॥ आचार्यसामयिकसाधक
पुत्रकाश्च॥ गावोद्विजा युवतयोयुतयः कुमार्योधर्मोभवंतुनिरतागु
रुभक्तियुक्ताः॥ १०॥ नंदंतुसाधककुलारणिमाद्यनिष्ठाशापाद्यनंतु

द्विषता: कुलयोगिनीनां॥ साशांभवीस्फुरतु कापि मम हृदवस्था:
यस्या गुरोश्चरणपंकजमेव लभ्यं॥ याश्च क्रमभूमिकावसतयो
नोडीशु यासंस्थिता॥ याकामरूपगमकूपनिलया: यासंस्थिता
धातुषु॥ ३कुयासोर्ध्वमरुत्तरंगनिलया: निश्वासवासाश्रया: स्तोद
व्योरिपुभङ्गभङ्गरागपरा: तृप्यंतु कोलार्चिता:॥ ३२॥ यादिव्यक्रमपा
लिकाद्विति गना: यामानरिष्याश्रया॥ व्योव्योमामृतमंडलामृतमया:

यः सर्वधासर्वदा ॥ यः सर्वांकुलमार्गपालनपराः शांतिप्रजकं त
मे ॥ ३२ ॥ ऊर्ध्वब्रह्मांडतोवादिविगगनतलेभूतलेनिष्कलेवा पाता
लेवानलेवासलिलपवनयोःयत्रकुत्रस्थितोवा ॥ क्षेत्रेपीठोपपीठा
दिषुचकृतपदाधूपदीपादिमांसैः ॥ प्रीतादेव्यासदानः शुभविधि
वलिनापांतुवीरेंद्रवंद्याः ॥ ब्रह्माश्रीः शेषदुर्गाः गुरुवटुवटुकाभै
रवाक्षेत्रपालाः ॥ वेतालादित्यरुद्राः ग्रहवसुमनसिद्धामरोगुह्यका

द्याः ॥ भूतागंधर्वविद्याधरऋषिपितृब्रह्मासुराहिप्रभूता ॥ योगी-
शाश्चारणाकिंपुरुषमुनिसुराः श्चक्रगा पांतु सर्वे ॥ १५ ॥ मत्स्यं रुरु
वांवपमिवपितृगणाश्चेद्देवाश्चवेद्योगिनी ॥ प्रीतिश्चेत्परदेवताश्च यु-
द्देवेवेदाप्रमाणां रुचे ॥ शाक्तेयं यदि दर्शनं भवति चेद्ब्राज्ञेयमेशाम्लि-
चेत्सत्यासास्तिलकौलिकाश्चयपि चेन्स्यात्मेजयः सर्वदा १६ तत्पं
तुमारः सर्वसमुद्राः सगणाधिपाः ॥ योगिन्यः क्षेत्रपालाश्च ममदे

ह्ये व्यवस्थिता॥ आब्रह्मस्तंभपर्यंतं ब्रह्माद्यं स्तंभसंयुतं॥ कालाग्
न्यादिशिवांतंच जगद्यज्ञेन तृप्यतु॥ इति शांतिस्तोत्रं॥ अथ वीर
वंदनादिस्तोत्रं॥ पठेत्त्विदं नमे वीरान् वीरवंदनमाचरेत्॥ स तु वे
वीरान्नमे वीरान्मंत्रसिद्धिः प्रयायते॥ जगत्त्रयाभ्यर्चितसासने
भ्यः परार्थसंवादनकोविदेभ्यः॥ समुद्धृतक्लेशमहोदरेभ्यो नमो
नमः साधकनायकेभ्यः॥ प्रहीनसर्वाश्रयवासनेभ्यो सर्वार्थतत्वो

७७ं

का॰प॰
७८

78

दितसाधनेभ्यः ॥ सर्वफलाभ्युदयरागोदितेभ्यो नमो नमः साध
कनायकेभ्यः ॥ विस्तीर्णसंसारमहार्णवेभ्यः तृष्णालतोन्मूल
नतत्परेभ्यः ॥ जरारुजामृत्युनिवारकेभ्यो नमो नमः साधकनाय
केभ्यः ॥ सद्धर्मरत्नाकरमायकेभ्यो निर्वाणमार्गोत्तमदेशिकेभ्यः
सर्वत्रसंपूर्णमनोरथेभ्यो नमो नमः साधकनायकेभ्यः ५ लो
कानुकंपाभ्युदितादरेभ्यः ॥ कारुण्यमैत्रीपरिभावितेभ्यः सर्वार्थ

शिव
७८

चर्यापरिपूरकेभ्यो नमो नमः साधकनायकेभ्यः ॥ ६ ॥ विध्वस्तनिः
शेषकुवासनेभ्यो ज्ञानाग्निनादग्धमलैः धनेभ्यः ॥ प्रज्ञापतिज्ञापरिपू
रकेभ्यो नमो नमः साधकनायकेभ्यः ॥ ७ ॥ सर्वार्थनाशापरिपूरकेभ्यो
वैनेयपद्माकरबोधनेभ्यः ॥ विस्तीर्णसर्वार्थगुणाकरेभ्यः नमो नमः
साधकनायकेभ्यः ॥ ८ ॥ अनंतकर्मार्जितशासनेभ्यः ब्रह्मेन्द्ररुद्रादिन
मस्कृतेभ्यः ॥ परस्परानुग्रहकारणेभ्यो नमो नमः साधकनायकेभ्यो

ॐ

का॰प
७५
79

॥८॥ विभ्रमभूत्वादिमहाभयेभ्यो प्रपंकाचारपरायणेभ्यः॥ सम्

मं सौभाग्यकलाकरेभ्यो नमो नमः शांभविशांभवेभ्यः॥ १०॥ विभ्रमा

दुष्कर्मजवासनेभ्यः समंततो युष्टमहायशेभ्यः॥ लभ्यामलज्ञानकृ

तार्थेभ्यो नमो नमः शांभविशांभवेभ्यः॥ ११॥ सर्वांगमांभोधिमहा

प्लवेभ्यः श्रीचक्रपूजार्थपरायणेभ्यः॥ श्रीवीरचर्याचरणाकुलेभ्यो

नमो नमः शांभविशांभवेभ्यः॥ १२॥ श्रीमंत्रकोटिद्युतिभूषणेभ्योक्षा

शिव

विंशदुल्लासदशातिगेभ्यः ॥ अद्वैततत्त्वामृतभाजनेभ्यो नमो नमः
शांभविशांभवेभ्यः ॥ ३३ ॥ षट्त्रिंशतालज्ञरागाभ्रायितेभ्यः प्रोत्फुल्ल
पद्माकरलोचनेभ्यः ॥ प्रतप्तचामीकरविग्रहेभ्यः नमो नमः शांभविशां
भवेभ्यः ॥ ३४ ॥ संवोधसंसारसुसंस्थितेभ्यः संसारनिर्वाणनिदर्शि
केभ्यः ॥ महाकृपावेष्टितमासनेभ्यो नमो नमः शांभविशांभवेभ्यः ॥ ३५
परैकविज्ञानरमाकुलेभ्यो वामाश्रिताचारभयानकेभ्यः ॥ स्वतंत्रवि

ॐ

का॰प॰
८०

80

ध्वस्तजन्मजन्मेभ्यो नमो नमः शांभविशांभवेभ्यः ॥ १६ ॥ श्मशानचर्याग्रम
हायकेभ्यो मोहान्धकारायहृद्दिनमेभ्यः ॥ परस्य राज्य परिपालकेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ १७ ॥ विधूकेशालिकपालकेभ्यो सुरा
सवारक्तविलोचनेभ्यः ॥ नवीनकांतारगातत्परेभ्यः नमो नमः शांभवि
शांभवेभ्यः ॥ १८ ॥ विभूतिलिप्तांगदिगंबरेभ्यो चिताग्निधूमालिभयान
केभ्यः ॥ सिद्धाष्टकादानमहामुनिभ्यो नमो नमः शांभविशांभवेभ्यः १९

शिव
८०

कपालपात्रामृतपानकेभ्यो ॥ श्रीभैरवाचाररतानादरेभ्यः ॥ स्वाधीनत्वी
न्यन्कृतनिर्जनेभ्यो नमो नमः शांभवि शांभवेभ्यः ॥ २० ॥ प्रशांतशास्त्रा
र्थविचारकेभ्यो विवृत्तनानारसकाव्यकेभ्यः ॥ निरस्तनिःशेषविक
ल्पकेभ्यो नमो नमः शांभवि शांभवेभ्यः ॥ २१ ॥ स्वात्मैकभावांतरिता
येभ्यः सायुज्यसाम्राज्यसुखाकरेभ्यः ॥ श्रीसच्चिदानंदतविग्रहेभ्यो न
मो नमः शांभवि शांभवेभ्यः ॥ २२ ॥ परापरसांमुपदमानसेभ्यो ब्रह्मादयज्ञान

ॐ
का॰प॰
८१

81

रसाकुलेभ्यः॥ शिवोहमित्याश्रितचेतनेभ्योनमोनमः शांभविशांभ
वेभ्यः॥२३॥ सर्वार्थसर्वदासर्वंसर्वंघटघटादिवत्॥ जगज्जनितविस्ता
रंब्रह्मैदमितिवेद्म्यहं॥ अहमेवपरोहंसः शिवंपरमकारणं॥ मत्त्यारो
मतुपश्चात्मालीनःसरससीगतं॥ सच्चिदानंदनिलयंपरंपरमकारणं
शिवाद्वयप्रकाशाढ्यंस्यामलंधाममधीमहि॥ अनेकवीररक्तकीर्तनेनसमु
ह्रतल्लेघामवामनोहं॥ संसारकांताररमहारणोतोस्मिनिमज्जमानंजग

द्धेरयं॥ इतिवीरवंदनादिस्तोत्रम्॥ पूर्ववत्पुनःश्रीपात्रमुद्धाप्य गुरु पादुकामंत्रं स्मरन्॥ शिरसिमंस्थाप्य॥ तदमृतंपात्रांतरेनिक्षिप्य मूलंस्मरन्॥ ॐधर्माधर्महविर्दीप्ते स्वात्माग्नौमनसास्रुचा॥ सुषुम्नावर्त्मनानित्यम इन्द्रवृत्तिर्जुहोम्यहं स्वाहा॥ इंपृष्ठेत्वाश्रीयात्॥ नाम्राादिपात्रादिकंगृहीत्वा ॐ नमोविवस्वतेब्रह्मरागाभास्वतेविष्णुतेजसेजगत्सावित्रेशुचयेसवित्रेकर्मदायि ने॥ ॐह्रांह्रीसः सूर्यायएषतेर्घोनमः॥ इतिसूर्यायार्घंदत्वा॥ ॐयज्ञाछिद्रनप

ॐ

का॰प॰
८२

82

छिद्रं यच्छिद्रं पूजनेमम ॥ छिद्रमवतुनिः छिद्रंभास्करस्यप्रसादतः ॥ इति
छिद्रावधारणांकृत्वा ॥ मूलेननिर्माल्यंशिरसिधृत्वा ॥ श्रीदेवीचरणोदकं
स्वीकृत्य ॥ पुनः प्राणायामकरषडंगन्यासान्विधाय ॥ गुरुस्तोत्रंपठित्वा
नैवेद्यंसाधकेभ्योदत्वा ॥ स्वयमपिकिंचित्स्वीकृत्य ॥ सुखंविहरेत् ॥ इति
श्रीरुद्रयामलेतंत्रेदक्षिणाकालिकापद्धतिसमाप्ता ॥ सं० ५४२ माघप्र
विष्टे ॥ १३ ॥ शुभंभूयात ॥ ० ॥ ० ॥ ॥ ॥

शिव
८२

नं० १४३५

कालिकादि पूजा पद्धति